# ॥ श्री महिषासुरमर्दिनि स्तोत्रम् ॥

## माँ दुर्गा , भय, भ्रम, नकारात्मकता और बाधाएँ दूर करती है

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

# ॥ श्री महिषासुरमर्दिनि स्तोत्रम् ॥

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते ।
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ॥
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते ।
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोचिनि घोषरते ॥
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

अयि जगदम्ब मदम्ब कदम्बवनप्रियवासिनि हासरते ।
शिखरिशिरोमणि तुङ्गहिमालयशृङ्गनिजालयमध्यगते ॥
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

अयि शतखण्डविखण्डितरुण्ड वितुण्डितशुण्डगजाधिपते ।
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ॥
निजभुजदण्डनिपातितखण्ड विपातितमुण्ड भटाधिपते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

अयि रणदुर्मदशत्रुवधोदित दुर्धरनिर्जरशक्तिभृते ।
चतुरविचारधुरीणमहाशिवदूतकृतप्रमथाधिपते ॥
दुरितदुरीह दुराशयदुर्मति दानवदूत कृतान्तमते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

अयि शरणागतवैरिवधूवर वीरवराभयदायकरे ।
त्रिभुवनमस्तकशूलविरोधि शिरोधिकृतामलशूलकरे ॥
दुमिदुमितामरदुन्दुभिनाद महोमुखरीकृत दिङ्मकरे ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

अयि निजहुंकृतिमात्र निराकृत धूम्रविलोचन धूम्रशते ।
समरविशोषितशोणितबीज समुद्भवशोणितबीजलते ॥

शिवशिव शुम्भनिशुम्भमहाहव तर्पितभूतपिशाचरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
धनुरनुसंग रणक्षणसंग परिस्फुरदङ्ग नटत्कटके ।
कनकपिशङ्ग पृषत्कनिषङ्ग रसद्भटशृङ्ग हतावटुके ॥

कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
सुरललना ततथेयि तथेयि कृताभिनयोदर नृत्यरते ।
ककुभां पतिवर धीं धीं धिमिकिट धिक्कट ध्वनिनादरते ॥

धिन्धिन्धिन्धिमि धिन्धिमि धिन्धिमि ध्वनिधीर मृदङ्गनिनादरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
जय जय जप्यजये जयशब्दपरस्तुतितत्परविश्वनुते ।
झणझणझिञ्झिमि झिङ्कृतनूपुरशिञ्जितमोहितभूतपते ॥

नटितनटार्धनटी नटनायक नाटितनाट्य सुगानरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अयि सुमनःसुमनःसुमनःसुमनः सुमनोहरकान्तियुते ।
श्रितरजनीरजनीरजनीरजनी रजनीकरवक्त्रवृते ॥

सुनयनविभ्रमरभ्रमरभ्रमर भ्रमराधिपते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
अविरलगण्ड गलन्मदमेदुर मत्तमतङ्गजराजपते ।
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधिराजसुते ॥

अयि सुदतीजनलालसमानस मोहनमन्मथराजसुते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
कमलदलामलकोमलकान्ति कलाकलितामलभाललते ।
सकलविलासकलानिलयक्रम केलिचलत्कलहंसकुले ॥

अलिकुलसङ्कुलकुवलयमण्डल मौलिमिलद्बकुलालिकुले ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥
करमुरलीरववीजितकूजित लज्जितकोकिलमञ्जुमते ।
मिलितपुलिन्दमनोहरगुञ्जित रञ्जितशैलनिकुञ्जगते ॥

निजगुणभूतमहाशबरिगण सद्गुणसम्भृतकेलितले ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

कटितटपीतदुकूलविचित्र मयूखतिरस्कृतचन्द्ररुचे ।
प्रणतसुरासुरमौलिमणिस्फुर दंशुलसन्नखचन्द्ररुचे ॥
जितकनकाचलमौलिपदोर्जित निर्भरकुञ्जरकुम्भकुचे ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते ।
कृतसुरतारकसङ्गरतारक सङ्गरतारकसूनुसुते ॥
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥

**॥ इति श्री महिषासुरमर्दिनि स्तोत्रम् सम्पूर्णम् ॥**